र्दूली द्वीपिनी व्याघ्री न खघ्री मृग शाम ...नी
करेणुका द्विप वाराही सूकरी कोली वकी
का कमृगांगना॥ ४०॥ ... सिंही शुनी व्या
घ्री मार्जारी शश की शशा॥ शृगाली वंचकी क्रो
ष्टी वानरी मर्कटी प्लवी॥ एणी कुरंगी हरिणी
महिषी सैरभी बेला॥ उरगी सर्पिणी व्याली
वृश्चिकी विषपुच्छिका॥ पिपीलिका वीरणादं
शा मत्कुणो ... बीजकः॥ दिवांधिका दी

र्घतुंडा छुछुंदर्यहिवल्लिका॥ गुंजप्रिय स्त्रीरणर
क्षुः शक्रगोपो दुशोणितं॥ ब्राह्मी विश्वाणिका ...
प्राघ्रकीटो महाकृमिः॥ ७४॥ इति चतुर्मेरावि॥
॥ विपिनं काननारण्यं गहनं गह्वरं वनं॥ आक्रीडो वा
टिको द्यानमारामो रजकानने॥ तरुर्महीतडो
वृक्षः पादपो वटपी कुटः॥ पलाशी मूलपः शाले
द्रुडुमो वल्लरीपतिः॥ प्रतानिनी लता वीरुत् ...
नीर्वृतति द्रुमा॥ अंकुरो द्विदलं कोडः प्रकांडो मूलप
स्तकं॥ मूलपाग्रे शिफा प्रांते शिफा शाफा वरोह
कः॥ उत्सेधं उच्छ्रय इध्मा दारु काष्ठं घनं गुडं
पल्लाशं पल्लवं पर्णं बर्हं पत्रं छदो दलं॥ कलिका
कोरकः कुड्मलः प्रफुल्लो विकचः स्फुटः॥ मुकुल
फुल्लमानाग्रो गुच्छ स्तवक गुच्छको॥ प्रसूनं कु
सुमं पुष्पं वृंतं प्रसववंधनं॥ ५०॥ मधु मरंदः पु
ष्पासवं परागो मकरंदकः॥ अश्वत्थः कुंजरसुधा
पिप्पलश्चलपत्रकः॥ जटी वटो जटापादो न्यग्रो
धः प्लक्षश्चाश्रितः॥ कटुपलाशस्त्रिदलः किंशुको
वकपुष्पकः॥ हेमपुष्पकी टफलो यज्ञदारुरु
दुंबरः॥ श्रीफलः शादुमो बिल्वो वकुलो हिजोलं
बुकाप्यं चंपको नीलफलो जंबूनीलो तराजकः आ
म्रा रसालः कामांगो माकंदः पिकवल्लभः॥ धूर्तो ति
सौरभः सौधुरसो माधव पादपः॥ शाल्मलिः की

सैनिलयः पिच्छिलो रक्तपुष्पकः ॥५५॥ हयमारः
शीघ्रपुष्पः करवीरो लताविषः ॥ सोमसारः कु
ष्टरिपुः खदिरो बाणपूरकः ॥ शमी भद्रा सूक्ष्मप
त्रा शुभा रामप्रियंकरी ॥ बब्बुरः शृंगिफलको दृ
ढबीजो विकंटकः ॥ शाखोटकः क्षीरकोडः सु
होनि स्त्रिंशपत्रिका ॥ केशरी रत्नपंथघ्रौंती चा
गेधात्रि धारिका ॥ उरबूको दीर्घदंडः एरंडः पाणि
पत्रकः ॥ हिंतालः स्थूलतालाक्ष्म स्तोलास्त्वण
निराधिपः ॥ सुंकोटः कटुकास्निग्धो गुप्तस्नेहो वि
षापहः ॥ वल्ली वृक्षो क्षीरपर्णी सर्जकुलरजो द्रव ॥
॥३६॥ चिरबिल्वो नक्तमालः करंजः कृमिमे
र्दनः ॥ आरग्वधो राजवृक्षः शम्याकश्चतुरंगु
लः ॥ पिचुमंदः पारिभद्रो निंबोरिष्टो कवल्कभो ॥
कुरवीरानुनी सर्जः ककुभोर्जुनवृक्षकः ॥ भूर्ज
विल्वद्रुमो बिंदुपत्रो रक्षादलो ज्वलः ॥ पुत्रंजीवः
पवित्राक्षः कुरबीजो र्भकप्रदः ॥ उत्पत्तः काहल
पुष्पा धुत्तूरः कनकाह्वयः ॥ अर्कः क्षीरदलः
स्थूलफलः शंकरपुष्पकः ॥ तिलकः पुड्रका
छिन्नकेशो वदनभूषणः ॥ पाटला कुंभिकामोघा
ताम्रपुष्पी जलस्थिति ॥ मुनिद्रुमः शाघ्रपुष्पो ग
स्त्या नवफलो मुनिः ॥ पिंडीपुष्पो नराशोकः के
कोलिः शोकनाशनः ॥६५॥ केतकी कंटाकिद

लोमशो शोकरदूषित्रा ॥ दीपपुष्पः स्वर्णपुष्पः तेष
को धूमराहित ॥ कर केदो वीरपुष्पः सिंदूरी वाण
नामकः ॥ प्रियंजीवो बंधुजीवो बंधुको बिंदुपुष्प
कः ॥६७॥ पनसः कंटकफलो महासर्जफलद्रुमः
अरण्यफलस्थी कदली मोचा रंभा सकृत्फला ॥ लां
गली त्र्यंबकफलो नालिकेरो दुरारुहः ॥ भल्ला
तकः स्फोटबीजो रुष्करस्तापलो वलः ॥ ॥७०॥
राजादनी निंबबीजः शुकेष्टो राजवल्लभः ॥ दंत
बीजः कुवफलो दाडिमो फलषाडवः ॥ अक्षोटकः
फलः स्नेहः गुंधराली गुप्ताशयः ॥ दंभरो नवदरीको
लः कर्कंधुः शत्रुकंटकः ॥ स्थूलबीजो राजकोलो
मधुरो हिमफनिलः ॥ केसराम्लो बीजपूरो रुचको
मातुलिंगकः ॥ चिंचा चुंचुक्रिका चुक्रा शाकचुक्रा
म्ल मल्लिका ॥ गेधपत्रो नागरंगो नारंगो मधुराम्लकः ॥
निंबूकाम्लरसा निंबूलि पाको बीजखंडकः ॥ जंबी
रको दंतशठो जंभो जंभीरजंभलो ॥७५॥ मधुराम
धुजंभीरा माधवी मधुजंभकः ॥ कपित्थो दंधिफल
को दधित्थो दंतशाखकतुः ॥ रुद्राक्षो नीलकंठाक्षः
सर्वीक्षो भूतनाशनः ॥ पाटीरं मलयोद्भूतं चंदनं
श्रीशिरद्रुमं ॥ पत्रांगं रक्तसारीरं रोहितं रक्तचंदनं ॥
७८॥ स्निग्धपत्रो गंधसारो गुग्गुलु धूपसूरुहः
अभावसारो गंधद्रु गुरु नीललोहितः ॥ विभ

८

न कर्षफलो भूतावासः कलिद्रुमः॥ घोया वक्र
तरुः पूगः क्रमुकोदीर्घपादपः॥ काश्मीरं घुसृणं
श्रोणं कुंकुमं केसरं शठं॥ ८०॥ मदगंधः मत्स्यप
र्णीः शक्तिपर्णी विषमच्छदः॥ दीपतरुः स्निग्धदारुः
सरलं पूतिकाष्ठकं॥ श्रीपुष्पं देवकुसुमं लवंगं
तीक्ष्णपुष्पकं॥ सप्तशिखा नामवल्ली तांबूली
भक्ष्यपत्रिका॥ गंधा कोठा दमनको दंडी तापसप
त्रकः॥ तुलसी सुभगा तीव्रा भूतघ्नी विल्वुवल्लभा॥
पाणिजाको मरुवकः खरपत्रः सुराह्वयः॥ छिन्नोद्भ
वामृतवल्ली गुडूची मधुपत्रिका॥ मूर्वा दूर्वा मधुर
सा मोरटा तेजनी गिरा॥ सोमवल्ली यमलता मधु
पुष्पी सुरोपिता॥ ८५॥ मगादनी शाकल्लता हेमपु
ष्पी विषापहा॥ तेजोवती वह्निफला वायसी कन
कप्रभा॥ ताम्रिका कृष्णला गुंजा शिखंडी कृष्णचूडि
का॥ वस्तांसिं हिका व्याघ्री वार्त्ताकी क्षुद्रघंटिका
शरपूंखा कांडपूंखा वाणपुंखेषुपुंखिका॥ महाव
ला संगपवी नीलव्यंजनकेशनी॥ निशावनोदीर्घ
शाखः खः शणोम्लोदीर्घपल्लवः॥ अपामार्गः सेकरि
को मर्कटी पक्तिकंटकः॥ वराहकर्णी तुरगी हय
गंधा हयप्रिया॥ शतावरी सूक्ष्मपत्रा वरमूला म
होदनी॥ ९०॥ क्षुरपत्रो दीर्घशरः इक्षुः पर्वा मधुद्रुव
गुडपुष्पो मधुरसो मधुकः स्निग्धपत्रकः॥ हरिद्र

रजनी श्यामा पिंगला वरवर्णिनी॥ लाक्षा जतुः खदि
रका पत्ना शीर्गधमादनी॥ अलक्तको जतुरसो रागो
निर्वासनाह्वयः॥ वह्निपुष्पी धातकी च मध्यवासिनी
शंखमूलं तीक्ष्णारसं मूलकं तीक्ष्णकं॥ ग्रंथिमूलं शि
खा कंदं गंजनं यवनप्रियं॥ वेत्रो वेतो योगिदंडः सुदं
डो मदपर्वकः॥ शृंगारको शृंगकंदो जलवल्ली विष
णकः॥ इक्षुनेत्रः सुनो रिष्याल्लशकंदः सिताडकः॥
भृङ्गप्रियः स्त्रीक्षण कंदः पलांडुर्मुखदूषणः॥ ९३॥ अ
र्शोघ्नः सूरणः कंदो वज्रकंदः कटूल्मकः॥ वास्तूकं वस्तु
वस्तूकं वास्तूकी श्वानचिल्लिका॥ क्षुरपत्रा स्निग्धप
त्री पालकं ग्रामवल्लभा॥ कर्कारुः कर्कफला कू
ष्मांडी मूत्रकृच्छ्रहा॥ कोशातकी दीर्घफपीत पु
ष्पी महापला॥ धरणापला स्थिरफलः कलिंगो मा
सलोतरः॥ धरा कोशातकी स्निग्धा मधुरा केफापि
जंतुघ्न॥ २००॥ वुद्धिघ्नी शोणितरुचिर्विरवीजी रक्त
बीजिका॥ वैशाखजं कटुरसं खटू चूर्ण हिमकर्क
टी॥ करालुस्त्रपुसी सीता कर्कटी हस्तिपर्णिका
सुगंधा धाधारतपुष्पा मल्लिका वरपत्रिका॥ वसंत
दूती वासंती माधवी मधुमल्लिका॥ यूथिका गणि
का वष्टा मागधी बालपुष्पिका॥ पुवंती हेमपु
ष्पी शिखंडी नागपुष्पिका॥ हरीतकी हेमवती शि
वा पथ्या जया मृता॥ सहस्रवेधी कस्तूरी मृगना
भिर्मृगांडजः॥ मालती सुमना जातिर्मुनिला नव
मल्लिका॥ एला वेडवला पृथ्वी नहुला गंधवी

जिका॥ अभयंनलभदोशीरोवीरतंवीरणाह्वयं॥२०॥
नीलतकुनकपित्सीकः पिछ्लद्रुमः मक्षिकाम्रः
कायमफलादंतहिद्रेव्यनामकं॥ विद्यामामिश्र
फलीनी पितहा महिषी सूनी॥ पुष्पवासो रागनालि
मज्ञाह्नामफलो गुलिः॥ दशापत्रं पीतरसं शातकुंप
तकेसरं॥ शतवर्गत्ताम॥ सदाफलं मिश्ररसं संभू
तं मिहिकामुकुं॥ कोदार्यं वापितं तत्वे कोविकाकर्ष
णं कृषिः॥ सीत्यं हल्यं हलाकृष्यं सीतालांगलप
द्धतिः॥१०॥ यव्यं यवक्यं शालेयं व्रैहेयं कोद्रवीण
कं॥ व्रीहिः शालिः सोकलाकः कमलः षष्टिको गुडः॥
कुरविंदः कोद्रवाख्यः श्यामाकः श्यामलो मिधः॥
कंगुः प्रियंगुर्नीवीरो मटकी कपिकचुकः॥ गोधूमो
वर्हणो वल्यसूची दाणारको यवोवलः॥ स्नेहो तिलो
वलीश्यामो मारीचः श्रवणकः पुटी॥ माषः संतर्प
णः स्निग्धो मुद्गो हव्याग्निमूर्लघुः॥ आढकी वा
तकी धन्या मुष्टिका धूलिभूमिकः॥ पथ्यं कुलस्थः
कुलत्थो मसूरो वातलो मृदुः॥ राजमाषो महामा
षः कलायो मुकुसन्निभः॥ सिद्धार्थकः सर्षपकृ
कपलावकुलातसी॥ आसुरी राजिका राजी ह्वेताजा
वः कृष्णबलः॥१६॥ इति श्री याज्ञि... वंशावतं
सवेणीदत्तविरचिते पंचतत्वप्रकाशनाम्नि कोशे भू
मिभानानाशवलोते षष्ठी मरीचिः प्रस्फूर्ति मगम
त्॥ चमूरनेकिनी सेना वृतानां वाहिनी बलं॥ सै

न्यंचरूथिनी चक्रं ध्वजिनी चतुरंगिनी॥ पताकिका ध्व
जः केतुर्नीसीरः पृतनामुखं॥ क्रोशतालः क्रोशर
ठ का विजयमर्द्दलं॥ आतोद्यं दुंदुभिर्भेरी अंकुर
कापटहानकौ॥ मृदंगो मुरजो ढिक्का ढिल्लिकाकं
स्यतालिका॥ शस्त्रमस्त्रं प्रहरणं हननं हेतुरायुधं
धनुः शरासनं चापः कोदंडः कार्मुकं धनुः॥ प्रत्यं
चासिंजनी मौर्वी ज्या जीवा चापडोरकः॥ चापम
ध्येनी कारिंगी वा ज्या तपवारणं॥५॥ कोदंड
मध्ये तलकः छुरिका खड्गधेनुका॥ वाणः कलंबो
विशिखः शरः पत्री शिलीमुखः॥ सायकेषुकंक
पत्रो नाभाचो मार्गणाभिधः॥ तूणीरइषुधिस्तू
णी निषंगः सायकाश्रयः॥ लक्षवेधनकं शरव्यं
कुठारः परशुः स्वधः॥ करवालो मंडलाग्रो ख
ड्गो सिर्लोहपन्नगः॥८॥ तखारिस्तीव्रभागः कृप
णः कोशमंदिरः॥ प्रासः कुंतो लोहविद्युत् फलकं
चर्म चार्मिकं॥९॥ हस्तिपको हस्तपालो निषादी
गजकैवित्॥ अश्वारोहो वाजिपालः सादी गंध
र्वधर्मवित्॥१०॥ यानं शकटं खड्गं हयगस्यं
दनेरथं॥ न यानं दोलिका दोलि भूपयानं चतुष्कि
का॥ अपराधो मंतुरागो दुंदुभिः पावलिकारः नि
वेशाशिवरं वस्त्रमंदिरं चोपकारिकं॥११॥ सन्न
द्धो दंशितः सज्जो वर्मितः कात्यवा...कः॥ धनु
र्द्धरो धनुर्जीवी धानुष्कश्चापजीविनः॥ निर्यो

मनं वा प्रस्थानं मभियेकणं ॥ पांसुधूली रजो
रेणुः केतुमान् वैजयंतिका ॥ अग्रेसरः पुरोयायी
पुरोगमो पुरःसरः ॥ प्रजवी त्वरितो वेगी वरस्वी
पवनो मवी ॥ शक्तिः पराक्रमो प्राणो विक्रमो
विजयो जयः ॥ पराजयः परिभवः कश्मलं मो
हमूर्छने ॥ संशयः शंको भितं लब्धः पराभूतः पराजि
तः ॥ निकाशनं निराकारो गलहस्तं परासनं ॥ नि
वीयणं निहननं मारणं परिवर्जनं ॥ मृतः परासुर्नि
जीवः प्रमितः स्यक्तजीवनः ॥ २० ॥ असुप्राणो
वसुर्जीवः आयुर्जीवितजीवने ॥ कबंधः शी
षरहितं श्मशानं पितृकाननं ॥ चिता चित्या चिति
का ष्टश्च्या मृतकमंदिरं ॥ विपत्तिरापदुःखाधिः
कृपणः शावकः शावः ॥ ३२ ॥ पग्रहा पग्रहो वंधः का
रवेधनमृदिरं ॥ सिंहनादो वीरनादः क्ष्वेडा विजयनिः
स्वनः ॥ परिघोलो हलगुडो मुद्गरो रुघनः स्मृगः ॥ प्रा
ठो मव्यं मृगया मांसं पललं मांसमामिषं ॥ २७ ॥ वि
हंगिका पाशिपटी वागुरा मृगवंधनी ॥ भूतिर्विभू
तिः संपत्तिः कोशो वसुसमुच्चयः ॥ जीविका वेतनं वृत्ति
२० द्रव्यं धनं धनं वसु ॥ कार्तस्वरं शातकुंभं हिरण्यं
हेम हाटकं ॥ रूप्यं श्वेतं दर्पणकं खर्जं तं तारं श्र
गुरु उदरं वरं म्लेच्छमुखं वरिष्ठं शुल्वं ताम्रकं
हेमरूकं मतलं रीतिला हेयं स्वा मायसं सूत्रो
रसः शंभु पारदो रसराजकः ॥ बाल्हीकं राम
ठं हिंगु कर्पूरं चंद्रनामकं ॥ सर्वरसा संचारं

वणोरा चकं वलं ॥ पाठं तक्रं दधि सुता मनवनीत सु
धासितं ॥ ३० ॥ आज्यं रेतो घृतं हव्यं तेजो ज्योतिः सु
धाजिकं ॥ रसातलं बलिगृहं पातालं शोषवेशनं ॥ त
लानलाधो भुवने नागलोको ह्ययं ॥ भूमिकारंध्रं रा
कं बिलं छिद्रं सुषिरं विवरं वपा ॥ गर्तावटो भूमि
खात स्तमिस्त्रं तिमिरं तमः ॥ ध्वांतं तमस्तं तमसं गाढ
ध्वांतो घनतामसं ॥ नागाः कद्रु
समुद्भवाः ॥ वासुकिस्तक्षकः शेषो धृतराष्ट्रो म
हाबलः ॥ ३५ ॥ कंबलाश्वतरावेते नागानां कुल
नायकाः ॥ जलव्यालो लगर्द्दो वाहसा नगराश
बुः ॥ त्वक्ककंचुकको मुक्ता राजिरां दंदुभो डुभिः ॥ नि
शीथनी निशा रात्रिर्यामिनी क्षणदा क्षपा ॥ तमस्विनी
तमी ज्योत्स्नी शशनी चंद्रिका ज्वला ॥ अमा कुहू
रमावस्या पूर्णिमा पूर्णचंद्रिका ॥ दृष्टचंद्रा सिनीवा
ली तिथि चंद्रकला क्रमः ॥ दुर्दिनं दिवसो वासरो
वासरोंहो दिवार्कभूः ॥ उषः कल्यं दिनमुखं प्रभा
तमरुणोदयः ॥ सायं निशामुखं संध्या मध्याह्नः
कुतुपः द्रोण ॥ ४० ॥ गणरात्रि निशावह्नो निशी
थो यामिनी दलो ॥ अनेहा समयः कालः कल्पांतः
प्रलयः क्षयः ॥ ४१ ॥ इति श्री यात्रिकवंशावतंसन
लकंठात्मज वेणीदत्त विरचिते पंचतत्वप्रकाशो
भूमि भानुः प्रस्फूर्ति मगमन मत् ॥ १ ॥ समुद्रः सागरः
सिंधुः सरस्वानर्णवोंबुधिः ॥ अकूपारो जलनिधिः
पारावारः पयोनिधिः ॥ १ ॥ रत्नाकरः सरिज्जाया वे
नबाहिमांशुभूः ॥ सुधापूर्णो समम तं सुराधवः सं

दूरसंधिकं॥ अमृतं जीवनं वारि भुवनं सलिलं पयः
शंवरं कमलं नीरं कीलालं पुष्करं जलं॥ कबंधमर्णो
मस्तोयं मुदकं कं कुशं शमं॥ ऊर्मिस्तरंगो लहरी
वीचिर्मर्गिर्जिलोद्धृतिः॥ महाकल्लोल उल्लोलो उ
त्लावर्त्ती वुसंभ्रमः॥ नदी धुनी द्वीपवती निम्नगा
तरनी सरित्॥ ५॥ आपगा वाहिनी सिंधुः स्रवंती
वक्रगामिनी॥ गंगा भगीरथी देवनदी त्रिपथगा
मिनी॥ भीष्मसूर्जह्नुतनया त्रिःस्रोता विष्णुपज्जी
नुः॥ कालिंदी यमुनाऽध्यामा सूर्यपुत्री यमस्वसा
नर्मदा सामसंभूता रेवा मेकलकन्यका॥ विपाशा
व्यासतनया करतोया सदाजला॥ ब्रह्मपुत्रो ब
ह्मपद्रो नैस्ताद्रेयो हरिप्रभः॥ स्वर्णवाहर्गुरु
वरः शोणो वन्याप्रवाहकः॥ जलविंदुर्जलक
णो विप्रुषः पृषतः पृषत्॥ कूलं तीरं तटो बप्रो ज
लसीमोपकंठ भूः॥ वैरवानुसः पृथुकुचामत्स्यो
मीनो झषास्तिमिः॥ १०॥ निर्मिमेषोंडजः प्रोष्ठः श
फरः शकुलः कंजः॥ कच्छपः कमठो लोष्ठो मंडू
को वारिवालकः॥ द्वीपांतरीयंतो या प्रंशारो
१२ जं वालकरमो॥ अगाधमतलस्पर्शं गंभीरं निम्न
कं नरे॥ फेनो कफे जेलो वारिशोफको जलबु
द्बुदं॥ अंधः कूपस्प्रही वापी वापिका दीर्घिका धु
का॥ निर्झरो झरणं शैलप्रस्रवो वानुकणो करः॥
सरोवरं पल्वलकं कासारः सरसी सरः॥ १५॥ प
द्माकरः पद्मरवं निसांडाग पुष्कराश्रयः॥ कुमु
द्वती कुमुदिनी कुमुदं दपद्मिनी॥ पंकजं कमलं

पद्मं नलिनं सरसीरुहं॥ पंकेरुहं तामरसं सारसं पुष्करं कं
ज॥ इंदीवरं नीलपद्मं पुंडरीकं सितोत्पलं॥ रक्तोत्पलं क
कनदं शतपत्रं कुशेशयं॥ शालूरं पद्मनालं कंदो मृणाल
विशेषतः स्कं॥ किंजल्कः केसरो जांभुर्नरं शैवाल
शैवलं॥ सिंधुवल्ली रागनालिः॥ प्रवालं विद्रुमा द्रुम॥
२०॥ सार्द्धत्रिवलयः कंबुः शंखः स्रूवा मुरवा वुनः
शुक्ति मौक्तिकमंजूषा मुक्तास्फोटो वुसूर्पिको॥ मे
क्तिकं शौक्तिकं मुक्ता स्वाती विंदुसमुद्भवं॥ कैवर्त्तो
धीवरो दासो नौकौ नौस्तरणिस्तरि॥ नौवाहक
कर्णधारो नाविको रिचुवालकः॥ आसेचनं केसप
त्रं मरित्रं बनिपातनं॥ चुद्रतारः प्रकूकालः वर्षा
भ्वी मंठ दुलिः॥ सेंदू रिवक्रो मकरो राजीवः शकुल
स्तिमिः॥ सहस्रदंष्ट्रः पाठीने मुसिको धटिको
नव॥ जलसत्वा पतिसाहः उलूपी शिशुमारकः
मत्स्यपाशी गुणिनिका बडिशं मत्स्यवेधनं॥ २५॥
नभश्चरो वायुदारुः खतमालः पयोधरः॥ व्योम
धूमो जलमिसि जलमुग्गीगन ध्वजः जीमूतो मु
दिरो मेघो घनो धाराधरो ऽबुदः॥ कादंबिनी मेघ
माला जैमूतं मेघसंभवं॥ २७॥ जलभानुः स्फू
र्त्ति म मत॥ भानुः सूर्यो दिनपतिः सविता भास्क
रोंशुमान्॥ हेलिः प्रकाशादि सो द्वादशात्मनो भो
मणिः॥ हरिः पतंगस्तरणिः सहस्रांशुर्विभाव
न॥ म्लो रिंदु रेणु तिलको नीहारांशुर्निशापतिः॥

१२

चंद्रः सुधांशुः शुभ्रांशुरोषधीशो भनायकः ॥ द्विज
राजः पक्षजन्मा कुंद्वेतो राहणीधवः ॥ वह्निरग्नि
वीयुसखः कृष्णवर्त्मा तनूनपात् ॥ धनंजयो वी
तिहोत्रो मधुकेतुर्विभावसुः ॥ हिरण्यरेता हुतभु
ग्ज्वलनो हव्यवाहनः ॥ कांतिश्छविः प्रभा दिप्ति
स्त्विड्डुविभा प्रकाशिकः ॥ ५ ॥ अर्चिर्ज्वाला वह्नि
शिखा कीला जिह्वा स्फुलिंगिनी ॥ संतापः सं
ज्वरस्तापो मंडलं चक्रवालकं ॥ विस्फुलिंगो
वह्निकाणो घर्मो ग्रीष्मस्तपो हिमा ॥ अभ्यंतरं त्व
ंतरालं परिधिः परिवेषकः ॥ तडिच्छतह्रदा
झंपा ह्रादिनी चंचला लाभा ॥ विद्युत्सौदामनी क
ण्ठास्वसा जलदवल्लिका ॥ महेंद्रशस्त्रं कुलिशं
शंबो वज्रं पविश्वरुः ॥ जन्वाल्वाल्लोग्रहमणिः
स्नेहदीपो जनध्वजः ॥ १० ॥ वर्षाबुदं शक्रधनुः
चित्रभुग्मजुरोहितं ॥ घृणिर्गभस्तिः किरणो दी
धितिश्च रणो वसुः ॥ रश्मिर्मरीचिरुस्रांशुक
रो भानुः प्रकाशकः ॥ अर्कसूतोरुणोनूरुस्ता
र्क्ष्यं ख्यातारुणद्युतिः ॥ कौमदी चंद्रिका ज्योत्स्ना क
लंक लक्ष्म लांछनं ॥ नक्षत्रं तारका तारा भंम
ह्रस्वमुरनिका ॥ मंगलो भूमितनयो रक्तांगो
मेषवाहनः ॥ ज्ञो बुधः श्चंद्रतनयो मृगरुग्बोध
नाह्वयः ॥ गुरुर्जीवः पीतवर्णो धिषणो देवता
र्चितः ॥ कौन्यो दैत्यगुरुः भृगुः शुक्रः षोडशार्चिर्मघा (?)
भवः ॥ मंदः शनैश्चरः क्रौडो पातांगः क्रूरलो

चनः ॥ अहिर्विधुंतुदो राहुः स्वर्भानुः सिंहिकासुतः ॥
आश्लेषाभू राहुशिरोग्रहो का केतु राहुकः ॥ म
हाधारो ध्रुवो ज्योती रथ उत्तानपादजः ॥ ज्यो
तिर्मुखी दीपशिखा दीपलेखा प्रदीपिका ॥ दीप
दारुणिका दीपयष्टिः करकयष्टिका ॥ उत्पात
मद्भुतं ज्वालो ज्वालोल्का पिशाचिका ॥ भूकं
पः पृथिवीचालो दिग्दाहो हरिदुल्मुकः ॥ १८ ॥
पंचतत्वप्रकाशे तेजो मानुः ॥ वायुः समीरणः क
पोगंधवाहप्रभंजनः ॥ नभस्वाननिलो वातः
पवमानः सदागतिः ॥ १ ॥ मातरिश्वा जगत्प्राणपृ
षदश्वोग्निसखश्मरुत् ॥ हिमं तुषारो मिहिका
प्रालेयं रजनीजलं ॥ घनोपलो मेघकफो क
रको वारिशर्करः ॥ इष्टगंधोति सुरभिः सुगंध
घ्राणतर्पणः ॥ आमोदः सुखकृद्घोदुर्गंधः पू
तिगंधकः ॥ स्पर्शः संस्पर्शनं त्वाजो जगत्प्राणे
द्रियाद्भवः ॥ ७ ॥ वायुमानुः ॥ आकाशो गग
नं नाकः स्वर्गस्त्रिदिवमंबरं ॥ अंतरिक्षं विय
द्व्योम खं विहायो महाबिलं ॥ इंद्रः शचीपतिर्व
ज्री सुत्रामा पाकशासनः ॥ वृत्रहा वासवः शक्रः
शतमन्युः सहस्रदृक् ॥ २ ॥ बाल्तोष्पतिर्नीक्रिप (?)
तिर्वज्री जिष्णुर्दिवस्पतिः ॥ पुलोमतनये द्राणी

शची सुरपतिप्रिया॥ जयंतः शक्रतनयः शक्रपूर
मरावती॥ नंदनवनं चित्रवितं सुधर्मा मघवत्सभा॥
हरिदाशा ककुप्काष्ठा दिशो दिग्व्योमपत्रिका॥
ऐंद्री प्राची पूर्वककुप् उदीची हरिदुत्तरा॥५॥ अ
प्राचीदक्षिणा याम्या प्रतीची पश्चिमास्तदिक्॥
पश्चौ पूर्वा उत्तरा तदिक् वायवी पावमानिका॥
पूर्वयाम्यान्तरा मग्नि नैर्ऋती राक्षसार्पिता॥
अंतरिक्षे ईदृग्ब्राह्मी पातालीफणिनेरो
दिक्॥ शक्रो वह्निर्यमो रक्षः पाशी वायुः श
शीश्वरो॥ ब्रह्मा शेष इति प्रोक्ताः पूर्वाद्यैर्दि
१३ गीश्वराः॥ ऐरावतः पुंडरीको वामनः कुमुदो जनः॥
पुष्पदंतः सार्वभौमः सुप्रतीको हरिद्गजा॥ य
मः कृतांतः शमनः समवर्ती परेतराट्॥ धर्म
राजः पितृपतिः कालो महिषवाहनः॥१०॥ नि
शाचरः पललभुग्राक्षसः कर्बुरोपमः॥ नैऋतः
कोणपः क्रव्यादाशरो निकषात्मजः॥ पाशीप्र
चेता वरुणो यादसांपतिरप्पतिः॥ पोलस्त्यस्य:
किंनराधीशो गुह्यकेशो गदायुधः॥ कुबेर
स्त्र्यंबकसखो राजाराजो धनाधिपः॥ मनु
ष्यधर्मा धनदो यक्षराण्णरवाहनः॥ तुरंगास्यः
किंपुरुषो मयुः किंनरपक्षकौ॥ आदो धनं

15

चैत्ररथमलकायक्षराट्पुरं॥ विमानं देवतायानं
गुह्यकेशस्य पुष्पकं॥ कैलासाद्रि स्थानं पुत्रस्तु
स्य नलकूबरो॥१५॥ सेवधिर्निधिनागारो दीनार
स्वर्णिका विकं॥ कल्पवृक्षः समुद्भूः संतानः पारि
जातकः॥ द्वे वैद्यौ नासत्यावश्विनेयौ भिषग्व
रौ॥ उच्चैःश्रवा श्वोश्चितुरगो मातलिः शक्रसारथिः
देवामरादितिसुता निर्जिताः त्रिदशाः सुराः॥ विबु
धाः सुमनसो लेखा गीर्वाणा मृतभोजनाः॥१८॥ स्व
र्गाग्निमुखा नाकी क्रतुभुक् व्योमयानकः॥ दैत्यो
सुरो दितिसुतः पूर्वदेवः सुराहितः॥ आदित्याभा
स्करा विश्वेवसवस्तुषितानिलाः॥ महाराजिक
रुद्राद्याः साध्याः प्रामागणेश्वरा॥२०॥ किंनराप्सरसः
सिद्धा रक्षो भूत पिशाचकाः॥ विद्याधरा गुह्यका
स्याशास्वेमी देवयोनयः॥ षडभिज्ञो जिनो बु
द्धः सुगतो द्वयवादकः॥ तथागतो दशबलो महा
देवीसुतो मुनिः॥ नारदः पर्वतसखः सुरर्षिर्युद्धर
र्षकः॥ नाकिवेश्या स्वर्गिणस्याप्सरो वारसि
विनी॥ तिलोत्तमोर्वशी रंभा सुकेशी मंजुघोषि
का॥ घृताची चित्रलेखाख्या मेनकाप्सरो व
राः॥२४॥ इति दिक्पालमरीचिः॥ ॥शब्दो निनादो
निनदो ध्वनिर्ध्वानिः स्वनो नरवः॥ निस्वानो निःस्वनो
नादो ह्रादनिर्घोषरावकः॥१॥ मर्मरो वस्त्रपर्णे

पुः स्विजितं भूषणारवः वीणाशब्दः क्वणः क्वा
णनिः क्वाणः प्रक्वाणं कृणो॥ प्रतिशब्दः प्रति
क्वाणो गीतं रागो रसारवः वांशिकं प्राशब्दरावो
हूषितं वाजिनिःस्वनः॥ कोलाहलः कलकले
बृंहितं गजगर्जितं॥ स्तनितं मेघनिर्नादो गर्जि
तं वारिवारवः॥ विक्लोकः क्रीडनरवो माणितं र
तजल्पितं॥ पृच्छा प्रश्नोनुयोगो स्वः प्रत्युक्तं प्रति
वाचकं॥ जनश्रुतिः किंवदन्ती कुत्सा निरावग
र्हणं॥ सुप्तिङ्तपदं वाक्यं वचनं भाषितं वचः॥
प्रणवादि श्रुतिर्वेदस्त्वाम्नायः केडिकातनुः॥
स्मृतिर्वेदार्थपुस्तिका मुनि॥ कृधर्मसंहिता
इतिहासः पुरावृत्तं पुराणं पंचलक्षणं॥ नीति
शास्त्रः काकुरूपं पासांतिवाक्यं॥ आख्या
यिकं द्विरुक्तं मुखे घृष्टं नर्मणो॥ कथाप्रबंध
कल्पनानुतिस्तोत्रं स्तुतिस्तवः॥ शपनं शपथः शा
पः क्रोधादुष्टविकथनं॥ आह्वानो कारणं हू
तिः विवादो वाक्कलहो नहूयो॥ इति शब्दमरीचिः॥
पतंगः पतगः पक्षी खगः पत्ररथोण्डजः॥ हंसः श्वे
तगरुत् श्वेतपक्षो मानसमंदिरः॥ राजहंसो
रक्तावस्वचरणो ण्डजनायकः॥ खंडरीटः खंड
नकः श्यामिकाकोरथागकः॥ १२॥ ताक्ष्यों गरु
त्मान् गरुडो वैनतेयोण्डजेश्वरः॥ नागांतकः पक्षि
सिंहः काश्यपिर्विष्णुवाहनः॥ गृध्रो दाक्षाय्य

काकोलः पत्रा श्यनः शशादनः॥ निशाटनो दि
वाभीतिः उलूको वायसांतकः॥ अन्नापीवि
क्लिती विलीस्ट्टिमो रटकोरटः॥ नीलकंठो म
णिः ग्रीवो शाकम्बायः किकिदिविः॥ ताम्रचूडः
कुक्कुटकः कृकवाकुः पद्मायुधः॥ काकः कर
टको रिष्टो द्विको ध्वांक्षः सकृत्प्रजः॥ स्वाम
कोकोड्डाण काकः काकोलः काकनायकः॥
कोकपुष्टो वनसखः कोकिलः पिकपंचमो॥
शिखी मयूरो ऽस्त्रसखः केकी बर्ही भुजंगभुक्॥
पृक्षियाघ्रस्तीक्ष्णरुंडो नखशास्त्रा खगांतकः॥
चरकः द्विरक्कर पातः कूरकुक्कुरखविज्ञको॥
ककुभस्तित्तरो लावो ज्जीवो वार्टपको बटेः॥
श्यामा कुमारी दुर्गीमा पारेकी भूमिदारिका॥ २०॥
कपिंजलः पक्षि मल्लः स्वकोरोरकलोचन॥
कुरंगाली लोनि रजः पिंगला रावि संवरः॥
कृष्णचूडः स्मररिपुः वुल्बुलोनीलपिंगलः॥ सा
रिका स्मारिका शारी पारावतकपोतकौ॥ की
रःशुकः खगबुधः केदारः शाल्मलिप्रियः॥ हं
सस्त्रीवरटा हंसी सारसी सारसप्रिया॥ पुष्क
रः सारसो लक्ष्मकादंबः कलहंसकः॥ भारद्वाजः
पक्षिमुनिः रंधिस्यः पांडुपाक्षिति॥ बल्मीलि रो
भ्रमेर पुलंबो मधुपो मितः॥ शिलीमुखो मधु

कः षट्पदः पुष्पलिट् पुष्पलिपः ॥२५॥ दीपप्रियः श
लभकः पतंगो ज्योतिरिंगक ॥ भ्रमरा मक्षिकानी
ला खद्योतो ज्योतिरिंगणः ॥ आरण्यमक्षिका
दंशः सरघा मधुमक्षिका ॥ छदः पत्रं गरुत्पक्ष
पतत्रं पुंखमंडनं ॥ चंचुस्त्रोटिश्चंचुकिका पक्ष
किः पक्षमूलकं ॥ संडीनो जीनको डीनाउड्डु
यानं रवको रुतं ॥ स्तोकसंघातनिकरव्रातयू
हसमूहका ॥ आवली वीथिका पंक्तिः श्रेणी
लेखा परंपरा ॥ काशोंडुपोशिका पशोकुलायो
नीडकोटरो ॥ गृहासक्ताः खगाः छेकागृहकागृ
हवासिनः ॥३०॥ इति श्रीउज्जमरा वि ॥ ॥ गणेशः
पार्वतीपुत्रो हेरंबो गणनायकः ॥ द्वैमातुरो विघ्न
२५ राजो लंबोदर गजाननो ॥ षडाननः स्मरो मारः
पुष्पधन्वा मनोभुवः ॥ शंबरारिः पंचशरः प्रद्युम्नो
नंगश्च च्युतिः ॥ अंबिका चंडिका दुर्गा मृडानी मे
नकात्मजा ॥ अपर्णा माहेमवती शिवा नाग्नि
रिशप्रिया ॥ शिवः शंभुः महादेवो दवहानो धवके
द्विषत् ॥ गंगाधरस्त्रिनयनः शंकरश्चंद्रशेखः
रः ॥ रुद्रः स्थाणुः पशुपतिर्भर्गः शूली पिनाक
धृक् ॥ वृषांतको नीलकंठ शोभनो गौरी त्रिपु
रांतकः ॥ पिनाकः शंभुको दंडो जटाजूटः कपर्द
कः ॥ प्रमथाद्याः पारिषदाः नंदी भृंगपादयोग

णाः ॥ ब्राह्मी माहेश्वरी काली कौमारी शक्रव
ल्लभा ॥ अपराजिता नारसिंही चामुंडे मातृ
मातुरः ॥ कृतधामा हृद्धिरण्यगर्भः पांचजन्य
धरोऽच्युतः ॥ गदी नारायणो विष्णुर्वैकुंठो वि
ष्टरश्रवाः ॥ त्रिविक्रमो वासुदेवो कौस्तुभी
गरुडध्वजः ॥ हृषीकेशो हरिः शौरिः श्री
वत्सो कौ रमापतिः ॥ कौमोदकी विष्णुगदा
शौरि चक्रं सुदर्शनं ॥ सारंगो च्युतकोदंडो
पांचजन्यो गर्भी सिनंदको ॥ ८० ॥ इंदिरा च्छिसुता
लक्ष्मीः कमला कमलालया ॥ विष्णुप्रिया
लोकमाता रमा मा श्रीः शशिस्वसा ॥ हलायु
धः कामपालो रेवतीरमणो बलः ॥ बलभ
द्रः प्रलंबारि बलभद्रो च्युताग्रजः ॥ आत्मभू
स्रष्टा कव्रह्मा चतुर्वक्त्रः प्रजापतिः ॥ हिरण्यग
र्भो द्रुहिणो विरंचिः सुरपूर्वजः ॥ अजः पिता
महः स्वयंभूः पद्मयोनिः श्रुतीशकः ॥ सावि
त्री वेदजननी गायत्री वेदवल्लभा ॥ ८४ ॥
इति गदित पदा शाद्धिकानां दकारी रुचि
रुचिर सुवर्णा द्वासमान प्रकाशः ॥ क्षिति
गगनतुरंगा क्षोणिसंख्ये के वर्षे ॥ १७०१ ॥ शु
चिधवलसुब्रह्मा भानुवारे बहस्ते ॥ ८५ ॥



पंचतत्वप्रकाशोयं वेणीदत्तेन धीमता । प्रका
शितः प्रकाशार्थं श्री विश्वेश्वरसमाज्ञया
इति श्री याज्ञिकवंशावतंसनीलकंठात्मज
याज्ञिकजगज्जीवनसूनुवेणीदत्तविरचिते
पंचतत्वप्रकाशे श्रीकाल मानुः प्रस्फु
नमित् ॥ समाप्तोऽयं पंचतत्वप्रकाशः ॥
पोथी पाठ्य सा हवकी ॥ ॥ ॥

१६

SADĀNANDA: VEDĀNTASĀRA

(Ms. Or. 172, Fols. 18r-34r)

Annot. 1o. द्वैतभानत Significacione ttt sequens: Dicunt inhaerentia Animae cum Brahma duo efficere et illa ab hoc separata post morte dicunt ambo unum fieri. Vnde अद्वया नंद Induplicitate latus, ita iam facto obito cum Brahma unitur c Igitus status Vita द्वैतभानत: Status alterius inta अद्वैतभानत: Dicunt. || 2o 4 अधिकारित्व Siue Condiciones requisitae ad Veram Scienciam Bedi 1o अधिकारि: 2o अनुबंध. 3o संबंध. 4o प्रयोजनं. || V. inferius ||

॥ ६० ॥ सिद्धिश्रीगणेशाय नमः ॥ ॥ अखंडं
सच्चिदानंदमवाङ्मनसगोचरं ॥ आत्मानमखि
लाधारमाश्रयेऽभीष्टसिद्धये ॥ अर्थतोप्यद्वया
नंदानतीतद्वैतभानतः ॥ गुरूनाराध्य वेदांतसा
रं वक्ष्ये यथामति ॥ २ ॥ वेदांतो नामोपनिषत्प्रमा
णं तदुपकारीणि च शारीरकसूत्रादीनि ॥ अ
स्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्वत्ता
सिद्धेर्न ते पृथगालोचनीयाः ॥ तत्रानुबंधो ना
माधिकारिविषयसंबंधप्रयोजनानि ॥ अधिका
री तु विधिवदधीतवेदवेदांगत्वेनापाततोऽधि
गताखिलवेदार्थोऽस्मिन् जन्मनि जन्मांतरे वा
काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रा
यश्चित्तोपासनानुष्ठानेन निर्गतनिखिलक
ल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टय
संपन्नः प्रमाता ॥ काम्यानि ज्योतिष्टोमादीनि स्व
र्गादीष्टसाधनानि ॥ निषिद्धानि नरकाद्यनिष्ट

1 प्रकरण qd. pars. || 2o अनुबंधै i.q. d. Adiuncta. || पृथग् alius तद्वत्त Ille ipse || नाम adm. Clare noti omnibus / विधिवदधीत Bonus lector || आपाततः Primum || अधिगत Intelligere. || अनुष्ठानं अनुष्ठानं Postea relictio || स्वांतः fort. Vent. सं

Indiuiso, uero, menti quieta, uerbo et corde inaccesso Enti omnia continenti innitor ob desideratum finem consequendum. Propiciando Magistrum q Nomine et re A. docanand à preteritum separacionis statu (in hac uita dicunt Aam a Brahma separatam) dicitur, Librum hunc Bedant Sar, p ingenio, edico ||

2 Bedant वेदांत quod libri nomen, nihil aliud est quam Sciencia Vpanekhad. || 3o Vpanekhad conficitur ex Regulis Libri शारीर. || 4o Huius c libri (quasi Sairokhed) appellatur unus in suis 4 condicionibus et in alterius hic mencio fit

अधिकारी de siue प्रमाता (quod est 1o q bene legit Bed. 5o Quietiam apprime intelligit, siue in hac siue in alia generacione, ibi quod bed et ei partes. Qui 5o omnibus in Sextarelatis rebus libere, et 4 Qui 4 condicionibus Vocti homi ...

काम्यं Est Sacrificiy perpetui et aliorum operum celo acquirendo adoperamur studio.

निषिद्ध c Infernum abhorrens adoperanis in faciendi ea ght hic meretur, ut c Brahmanis occisio


साधनानिब्राह्मणहननादीनि॥नित्यानिअ
करणेप्रत्यवायसाधनानिसंध्यावंदनादीनि
॥नैमित्तिकानिपुत्रजन्माद्यनुबंधानिजातेष्टया
दीनि॥प्रायश्चित्तानिपापक्षयसाधनानिचां
द्रायणादीनि॥उपासनानिसगुणब्रह्मविष
यमानसव्यापाररूपाणिशांडिल्यविद्यादी
नि॥एतेषांनित्यादीनांतुबुद्धिशुद्धिःपरंप्रयोज
नं॥उपासनानांतुचित्तैकाग्र्यं॥तमेतमात्मानंब्रा
ह्मणावेदानुवचनेनविविदिषंतियज्ञे
नेत्यादिश्रुतेः॥तपसाकल्मषंहंतिविद्ययामृ
तमश्नुतइत्यादिस्मृतेश्च॥नित्यनैमित्तिकयो
रुपासनानांचावांतरफलंपितृलोकसत्यलो
कावाप्तिः॥कर्मणापितृलोकोविद्ययादेवलो
कइतिश्रुतेः॥साधनानिनित्यानित्यवस्तुविवे
केहामुत्रार्थफलभोगविरागशमादिषट्सं
पन्मुमुक्षुत्वानि॥नित्यानित्यवस्तुविवेकस्ताव


19
द्ब्रह्मैवनित्यंवस्तुततोन्यदखिलमनित्यमि
तिविवेचनं॥ऐहिकानांस्रक्चंदनादिविषय
भोगानांकर्मजन्यतयाअनित्यत्ववदामुष्मि
कानामप्यमृतादिविषयभोगानामनित्यत
यातेभ्योनितरांविरतिरिहामुत्रार्थफलभो
गविरागः॥शमादयःशमदमोपरतितितिक्ष
समाधानश्रद्धाः॥शमस्तावत्श्रवणादिव्य
तिरिक्तविषयेभ्योमनसोनिग्रहः॥दमोबाह्ये
न्द्रियाणांतद्व्यतिरिक्तविषयेभ्योनिवर्तनं॥नि
वर्तितानांतेषांतद्व्यतिरिक्तविषयेभ्यउपरम
णमुपरतिः॥अथवाविहितानांकर्मणांविधि
नापरित्यागः॥तितिक्षाशीतोष्णादिद्वंद्वस
हिष्णुता॥निगृहीतस्यमनसःश्रवणादौतदनु
गुणविषयेचसमाधिःसमाधानं॥गुरुवेदां
तादिवाक्येषुविश्वासःश्रद्धा॥मुमुक्षुत्वंमोक्षे
च्छा॥एवंभूतःप्रमाताधिकारी॥शांतोदां



तं इति श्रुतेः ॥ उक्तं च ॥ प्रशान्तचित्ताय जितेन्द्रिया
य प्रहीणदोषाय यथोक्तकारिणे । गुणान्विता
यानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे
इति ॥ विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं त
त्रैव वेदान्तानां तात्पर्यात् ॥ संबंधस्तु तदैक्यप्र
मेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बो
ध्यबोधकभावलक्षणः ॥ प्रयोजनं तु तदैक्य
प्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानंदावाप्तिश्च
॥ तरति शोकमात्मविदिति श्रुतेः ॥ ब्रह्मवेद ब्रह्मै
व भवति इत्यादि श्रुतेः ॥ अयमधिकारी जननमर
णादिसंसारानलसंतप्तः प्रदीप्तशिरा जलरा
शिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरु
मुपसृत्य तमनुसरति समित्पाणिः श्रोत्रियम
त्यादि श्रुतेः ॥ सोऽपि परमकृपयाऽध्यारोपापवा
दन्यायेनैनमुपदिशति ॥ तस्मै स विद्वानुपस
न्नाय प्राहेत्यादि श्रुतेः ॥ असर्परूपायां रज्जौ

२



20

सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः ॥ वस्तु
सच्चिदानन्दाद्वयं ब्रह्म ॥ अज्ञानादिसकलज
डसमूहोऽवस्तु ॥ अज्ञानं तु सदसद्भ्यामनिर्वच
नीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्कि
चिदिति वदंति ॥ अहमज्ञ इत्याद्यनुभवात् ॥ देवा
त्मशक्तिं स्वगुणैर्निगूढामित्यादि श्रुतेश्च ॥ इ
दमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमि
ति च व्यवह्रियते ॥ तथाहि ॥ यथा वृक्षाणां सम
ष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः ॥ यथा
वा जलानां समष्ट्यभिप्रायेण जलाशय इति व्य
पदेशः ॥ तथा नानात्वेन प्रतिभासमानानां जी
वगतानामज्ञानानां समष्ट्यभिप्रायेण तदेक
त्वव्यपदेशः ॥ अजामेकामित्यादि श्रुतेः ॥ इयं स
मष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना ॥ एत
दुपहितं चैतन्यं सर्वैश्वरत्वसर्वनियंतृत्वादिगु
णकमव्यक्तमंतर्यामि जगत्कारणमीश्वर इति
च व्यपदिश्यते ॥ सकलाज्ञानावभासकत्वात्



यःसर्वज्ञःसर्वविदित्यादिश्रुतेः॥अस्येयंसमष्टि
रखिलकारणत्वात्कारणशरीरमानंदप्रचुरत्वा
त्कोशवदाच्छादकत्वाच्चानंदमयकोशः॥स
र्वोपरमत्वात्सुषुप्तिः॥अतएवस्थूलसूक्ष्मप्रपं
चलयस्थानमितिचोच्यते॥यथावनस्यव्यष्ट्य
भिप्रायेणवृक्षाइत्यनेकत्वव्यपदेशः॥यथाज
लाशयस्यव्यष्ट्यभिप्रायेणजलानीति॥तथाऽ
ज्ञानस्यव्यष्ट्यभिप्रायेणतदनेकत्वव्यपदेशः
॥इंद्रोमायाभिःपुरुरूपईयतइत्यादिश्रुतेः॥
अत्रव्यस्तसमस्तव्यापित्वेनव्यष्टिसमष्टिता
व्यपदेशः॥इयंव्यष्टिर्निकृष्टोपाधितयामलिन
सत्वप्रधाना॥एतदुपहितंचैतन्यमल्पज्ञत्वा
नीश्वरत्वादिगुणकंप्राज्ञइत्युच्यते॥एकाज्ञा
नावभासकत्वात्॥अस्यप्राज्ञत्वमस्पष्टोपाधि
तयाऽनतिप्रकाशकत्वात्॥अस्यापीयमहंकारा
दिकारणत्वात्कारणशरीरमानंदप्रचुरत्वाद
वहेतोशनंदमयकोशः॥सर्वोपरमत्वात्सुषुप्ति



21

॥स्थूलसूक्ष्मशरीरलयस्थानमितिचोच्यते॥तदा
नीमेतावीश्वरप्राज्ञौचैतन्यप्रदीप्ताभिरतिसूक्ष्मा
भिरज्ञानवृत्तिभिरानंदमनुभवतः॥आनंदभुक्
चेतोमुखःप्राज्ञइत्यादिश्रुतेः॥सुखमहमस्वा
प्संनकिंचिदवेदिषमितिसुत्थितस्यपरामर्शोपप
त्तेश्च॥अनयोर्व्यष्टिसमष्ट्योर्वनवृक्षयोरिवजला
शयजलयोरिवाभेदः॥एतदुपहितयोरीश्वरप्राज्ञ
योरपिवनवृक्षावच्छिन्नाकाशयोरिवजलाशय
जलगतप्रतिबिंबाकाशयोरिवाभेदः॥एषसर्वे
श्वरइत्यादिश्रुतेः॥वनतदवच्छिन्नाकाशयो
र्जलाशयतद्गतप्रतिबिंबाकाशयोर्वाऽऽधारा
नुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्य
योराधारभूतंयदनुपहितंचैतन्यंतत्तुरीयमित्यु
च्यते॥शिवमद्वैतंचतुर्थंमन्यंतइतिश्रुतेः॥इदमे
वतुरीयंशुद्धचैतन्यमज्ञानतदुपहितचैतन्याभ्या
मविविक्तंसन्महावाक्यस्यवाच्यंविविक्तंसल्लक्ष्य
मितिचोच्यते॥अस्याज्ञानस्यावरणविक्षेपना

Materia duas potencias habet आवरण et विक्षेप: Sicut modica nubes [illegible] operit sphaeram solarem [illegible] interposi-cione, sic Materia [illegible] 3 Intellectus operit [illegible] quae in nobis [illegible] dicunt.

Intellectus impeditus [illegible] potest [illegible] impeditus [illegible] Ita [illegible] videtur Brahma [illegible] dicat [illegible]

Vi hic Potencia Operiendi in materia oritur [illegible], fruicio, Voluptas, [illegible] et alia affectiones.

Sicut [illegible] ignorancia [illegible] hic [illegible] serpente habetur.

2a Potencia [illegible] विक्षेप [illegible] Materia [illegible] tencia [illegible] alterna [illegible] elementorum intra se [illegible] idest [illegible] Brahma [illegible] fecit.

मकंशक्तिद्वयमस्ति॥आवरणशक्तिस्तावदल्प
ोपिमेघोनेकयोजनायतमादित्यमंडलमवलो
कयितृनयनपथपिधायकतयायथाछादय
तीवतथाज्ञानंपरिछिन्नमपियात्मानमपरि
छिन्नमसंसारिणमवलोकयितृबुद्धिपथपि
धायकतयाछादयतीवतादृशंसामर्थ्य॥तदुक्तं
॥घनछन्नदृष्टिर्घनछन्नमर्कंयथामन्यतेनिःप्र
भंचातिमूढः॥तथाबद्धवद्भातियोमूढदृष्टेःसनि
त्योपलब्धिस्वरूपोहमात्माइति॥अनावरणश
क्त्यावृतस्यात्मनःकर्तृत्वभोक्तृत्वसुखित्वदुःखि
त्वादिसंसारसंभावनाअपिसंभवति॥यथास्वा
ज्ञानेनावृतायांरज्जौसर्पत्वसंभावना॥विक्षेप
शक्तिस्तुरज्जुअज्ञानस्वावृतरज्जौस्वशक्त्यासर्पा
दिकमुद्भावयति॥एवमज्ञानमपिस्वावृतात्मनि
स्वशक्त्याआकाशादिप्रपंचमुद्भावयति॥ता
दृशंसामर्थ्य॥तदुक्तं॥विक्षेपशक्तिर्लिंगादिब्र
ह्मांडांतंजगत्सृजेत्॥शक्तिद्वयवदज्ञानोपहि

कर्तृत्वं idest Ego agens [illegible] प्रपंच Nihil aliud [illegible] adaptio Materiae seu Elementorum [illegible] Brahmanis.

तंचैतत्स्वप्रधानतयानिमित्तंस्वोपाधिप्रधान
तयोपादानंचभवति॥यथालूतातंतुकार्यंप्रति
स्वप्रधानतयानिमित्तंस्वशरीरप्रधानतयोपा
दानंचभवति॥तमःप्रधानविक्षेपशक्तिम
दज्ञानोपहितचैतन्यादाकाशःआकाशाद्वा
युःवायोरग्निःअग्नेरापःअद्भ्यःपृथिवीचोत्प
द्यते॥तस्माद्वाएतस्मादात्मनआकाशःसंभूतइ
त्यादिश्रुतेः॥तेषुजाड्याधिक्यदर्शनात्तमःप्रा
धान्यंतत्कारणस्य॥तदानींसत्वरजस्तमांसि
कारणगुणप्रक्रमेणतेष्वाकाशादिषू
त्पद्यंते॥तान्येवसूक्ष्मभूतानितन्मात्राण्यपंची
कृतानिचोच्यंते॥तेभ्यःसूक्ष्मशरीराणिस्थू
लभूतानिचोत्पद्यंते॥सूक्ष्मशरीराणिसप्तदशा
वयवानिलिंगशरीराणि॥अवयवास्तुज्ञानेंद्रिय
पंचकं॥बुद्धिमनसी॥कर्मेंद्रियपंचकं॥वायुपंच
कंचेति॥ज्ञानेंद्रियाणि॥श्रोत्रत्वक्चक्षुर्जिह्वा:

Sicut aranea respectu [illegible] causa extrinseca [illegible] prioritate, et causa intrinseca [illegible] corporis sui ex quo [illegible] prioritatem. Sic Materia duplici potencia [illegible] Brahma [illegible] causa extrinseca [illegible] prioritate [illegible] causa vero Extrinseca [illegible] prioritate [illegible] causa intrinseca constituens. Materia [illegible] potencia [illegible] आकाश ex hoc Ventus [illegible] आकाश [illegible] aer [illegible] Ventus [illegible]

In materia [illegible] ignorancia [illegible] prioritatem habet, Et sic tres illi affectiones constitutivae ordine suo oriuntur in Elementis. [illegible] Elementa [illegible] पंची [illegible] quaeque Entia subtilia [illegible] oriuntur.

सूक्ष्मशरीराणि sunt 17

5 ज्ञानेंद्रियाणि Auris, pellis, oculus, lingua, nasus [illegible] tactus, visus, gustus, odoratus

प्राणाख्यानि।एतानि पुनराकाशादीनां सात्वि
कांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्य
ते॥बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः॥
मनो नाम संकल्पविकल्पात्मिकांतःकरणवृ
त्तिः॥अनयोरेव चित्ताहंकारयोरंतर्भावः॥एते पु
नराकाशादिगतसात्विकांशेभ्यो मिलितेभ्य उत्पद्यं
ते॥एषां प्रकाशात्मकत्वात् सात्विकांशकार्यत्वं
इयं तु बुद्धिर्ज्ञानेंद्रियैः सहिता सती विज्ञानमयको
शो भवति॥अयं कर्तृत्व भोक्तृत्वाद्यभिमानित्वेने
हलोक परलोकगामी व्यावहारिको जीव इत्यु
च्यते॥मनस्तु कर्मेंद्रियैः सहितं सन्मनोमयको
शो भवति॥कर्मेंद्रियाणि वाक्पाणिपादपायूप
स्थाख्यानि॥एतानि पुनराकाशादीनां रजोंशे
भ्यो व्यस्तेभ्यः समस्तेभ्यः पृथक् क्रमेणोत्पद्यंते
वायवः प्राणापानव्यानोदानसमानाः॥प्राणो ना
म प्राग्गमनवान् नासाग्रस्थानवर्ती॥अपानो ना

पृथक् पृथक् jada jada. ॥ प्राग्गमनवान् Sursum ideas. ॥ अवाग्गमनवान्
deorsum tendens.



मावाग्गमनवान् पाय्वादिस्थानवर्ती॥व्यानो ना
म विष्वग्गमनवान् अखिलशरीरवर्ती॥उदानो ना
म ऊर्ध्वगमनवान् कंठस्थानवर्ती॥उत्क्रमणवायुः
॥समानः शरीरमध्यगो शितपीतान्नादिसमी
करणकरः॥केचित्तु॥नागकूर्मकृकलदेवदत्त
धनंजयाख्याः॥पंचान्ये ववायवः संतीति वदं
ति॥नाग उद्गिरणकरः॥कूर्म उन्मीलनकरः॥कृ
कलः क्षुधाकरः॥देवदत्तो जृंभणकरः॥धनं
जयः पोषणकरः॥एतेषां प्राणादिष्वंतर्भावात्
प्राणादयः पंचैवेति केचित्॥एतत्प्राणादिपंचकं
आकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यते
॥तत्राप्ययं क्रमः॥आकाशाच्छ्रोत्र वागिंद्रिये॥
वायोस्त्वक्पाणी तेजसश्चक्षुःपादौ॥अद्भ्यो
जिह्वोपस्थौ॥पृथिव्या घ्राणपाय्विंद्रिये॥इदं
प्राणादिपंचकं कर्मेंद्रियैः सहितं सत्प्राणम
यकोशो भवति॥अस्य क्रियात्मकत्वेन रजोंश
कार्यत्वं॥एषु कोशेषु मध्ये विज्ञानमयो ज्ञान

विषय Semperfontinae a प्रक्षपरि ॥ melad







25





यमेतिवदन्ति॥प्रभाकरतार्किकावन्योंतरआत्मानं
दमयइत्यादिश्रुतेः॥बुद्ध्यादीनामज्ञानेलयद
र्शनात्॥अहमज्ञोहंज्ञानीत्याद्यनुभवाच्चज्ञानमा
त्मेतिवदतः॥भट्टस्तु॥प्रज्ञानघनएवानंदमय
इत्यादिश्रुतेः॥सुषुप्तौप्रकाशाप्रकाशसद्भावात
॥अहंनजानामीत्याद्यनुभवाच्चअज्ञानोपहित
चैतन्यमात्मेतिवदति॥अपरोबौद्धः॥असदेवेद
मग्रआसीदित्यादिश्रुतेः॥सुषुप्तौसर्वाभावात
अहंसुषुप्तौनासमित्युत्थितस्यस्वाभावपराम
र्शविषयानुभवाच्चशून्यमात्मेतिवदति॥एतेषां
पुत्रादीनामनात्मत्वमुच्यते॥एतैरतिप्राकृतादिवादिभिरुक्तेषु
तियुक्त्यनुभवाभासेषुपूर्वपूर्वोक्तश्रुतियुक्त्य
नुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवा
भासैःआत्मत्वबाधदर्शनात्पुत्रादीनामना
त्मत्वंस्पष्टमेव॥किंच॥प्रत्यगस्थूलोचक्षुरप्राणो
ऽमनाअकर्तावैतन्यंचिन्मात्रंसदितिप्रबलश्रु

तिविरोधादस्यपुत्रादिशून्यपर्यंतस्यजडस्यचैतन्य
भास्यत्वेनघटादिवदनात्मत्वात्अहंब्रह्मेतिवि
द्वदनुभवप्राबल्याच्च॥तत्तच्छ्रुतियुक्त्यनुभवाभा
सानांबाधितत्वात्पुत्रादिशून्यपर्यंतमखिल
मनात्मैव॥अतस्तत्तद्भासकंनित्यशुद्धबुद्धमुक्त
सत्यस्वभावंप्रत्यक्चैतन्यमेवात्मतत्वमिति
वेदांतविद्वदनुभवः॥एवमध्यारोपः॥अपवा
दोनामरज्जुविवर्तस्यसर्पस्यरज्जुमात्रत्ववद्वस्तु
विवर्तस्यावस्तुनोज्ञानादेःप्रपंचस्यवस्तुमात्रत्वं
॥तथाहि॥एतद्भोगायतनंचतुर्विधंशरीरजातंभो
ग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभु
वनानिएतदाश्रयभूतंब्रह्मांडंचैतत्सर्वमेतेषां
कारणभूतंपंचीकृतभूतमात्रंभवति॥एतानि
शब्दादिविषयसहितानिपंचीकृतानिभूतानि
॥सूक्ष्मशरीरजातमेतत्सर्वमेतेषांकारणभू
तापंचीकृतभूतमात्रंभवति॥एतानिसत्वादि
गुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैत



कारणभूताज्ञानोपहितचैतन्यमात्रं भवति। एतद
ज्ञानमज्ञानोपहितचैतन्यं चेश्वरादिकमेतदा
धारभूतानुपहितचैतन्यं तुरीयं ब्रह्ममात्रं भव
ति। अस्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थ
शोधनमपि सिद्धं भवति। तथाहि। अज्ञानादि
समष्टिरेतदुपहितसर्वज्ञत्वादिविशिष्टं चैतन्य
मेतदनुपहितं चैतन्यं त्रयं तप्तायःपिंडवदेकत्वेना
वभासमानं तत्पदवाच्यार्थः। एतदुपाध्युपहिता
धारमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति। अ
ज्ञानादिव्यष्टिरेतदुपहितमल्पज्ञत्वादिविशिष्टं
चैतन्यमेतदनुपहितं चैतन्यं त्रयं तप्तायःपिंडवदेक
त्वेनावभासमानं त्वंपदवाच्यार्थो भवति। एत
दुपाध्युपहिताधारभूतमनुपहितं प्रत्यगान
दं तुरीयरूपं चैतन्यं पदलक्ष्यार्थो भवति। अथ
वाक्यार्थो वर्ण्यते। इदं तत्त्वमसीति वाक्यं संबंधत्र
येणाखंडार्थबोधकं भवति। संबंधत्रयं नाम पद
योः सामानाधिकरण्यं पदार्थयोर्विशेषणवि

20

28

शेष्यभावः। प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभा
वश्चेति। तदुक्तं। सामानाधिकरण्यं च विशेषण
विशेष्यता लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्म
नामिति। सामानाधिकरण्यसंबंधस्तावद्यथा
सोयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्त
वाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायं
शब्दस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः। तथा तत्त्व
मसीति वाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचक
तत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वं
पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः। विशेष
णविशेष्यभावसंबंधस्तु यथा। तत्रैव वाक्ये सशब्दा
र्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैत
त्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्त
कतया विशेषणविशेष्यभावः। तथात्रापि वाक्ये
तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदा
र्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभे
दव्यावर्तकतया विशेषणविशेष्यभावः। ल



भागलक्षणा

स्थलक्षणा तावत्संभवे वस्तु यथा॥ तत्रैव सशाश्यं
शाष्ट्योस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशि
ष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सहलक्ष
णा तावत्॥ तथात्रापि तत्त्वंपदयोस्तदर्थयोर्वा वि
रुद्धपरोक्षापरोक्षत्वादिविशिष्टत्वपरित्यागेनावि
रुद्धचैतन्येन सह लक्षणा तावत्॥ इयमेव भा
गलक्षणेत्युच्यते॥ अस्मिंश्च वाक्ये नीलमुत्पलमि
ति वाक्यवद्वाक्यार्थो न संगच्छते॥ तत्र तु नीलप
दार्थनीलगुणस्य उत्पलपदार्थोत्पलद्रव्यस्य च
शौक्ल्यपटादिव्यावर्तकतया अन्योन्यविशेषणवि
शेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य
वा तदैक्यस्य वाक्यार्थस्य वाक्यार्थत्वांगीकारे प्र
माणांतरविरोधाभावाद्वाक्यार्थः संगच्छते॥ अत्र
तु तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंप
दार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभे
दव्यावर्तकतया विशेषणविशेष्यभावसंसर्ग
स्यान्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वा

22



क्यार्थस्य वाक्यार्थत्वांगीकारे ऽत्यन्ताहितप्रमाण
विरोधाद्वाक्यार्थो न संगच्छते॥ अत्र तु गंगायां घो
षः प्रतिवसतीतिवज्जहल्लक्षणा न संगच्छते॥ तत्र
तु गंगाघोषयोराधाराधेयभावलक्षणस्य वा
क्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषप
रित्यज्य तत्संबद्धतीरलक्षणाया युक्तत्वाज्जहल्ल
क्षणा संगच्छते॥ अत्र तु परोक्षापरोक्षचैतन्यैक
त्वस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागांतरम
पि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्ष
णा न संगच्छते॥ न च गंगापदं स्वार्थपरित्यागेन य
था तीरपदार्थं लक्षयति। तथा तत्पदं त्वंपदं वा स्वा
र्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा लक्षयत्वत्र
तः कुतो जहल्लक्षणा न संगच्छत इति वाच्यं॥ तत्र
तीरपदाश्रवणेन च तदर्थप्रतीतौ लक्षणया त
त्प्रतीत्यपेक्षायामपि अस्तु तथा ऽत्र तु तत्त्वंपद
योः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पु
नरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावा

ताश्च शोणो धावतीति वाक्यवत् अजहल्लक्ष-
णा न संगच्छते। तत्र शोणगुणगमनलक्षणस्य
वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तदाश्र-
याश्वादिलक्षणायां तद्विरोधपरिहारसंभवाद-
जहल्लक्षणा संभवति। अत्र तु परोक्षत्वापरोक्ष-
त्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरु-
द्धत्वात् तदपरित्यागेन तत्संबंधिनो यस्य कस्यचि-
दर्थस्य लक्षितत्वेपि तद्विरोधापरिहारादजह-
ल्लक्षणा न संभवत्येव। न च तत्पदं त्वंपदं वा स्वा-
र्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वंपदा-
र्थं तत्पदार्थं वा लक्षयतु अतः कथं प्रकारान्त-
रेण भागलक्षणांगीकरणमिति वाच्यं। एकेन पदे-
न स्वार्थांशपदार्थान्तरोभयलक्षणाया असं-
भवात् पदान्तरेण तदर्थप्रतीतौ लक्षणया पुन-
स्तत्प्रतीत्यपेक्षाभावाच्च। तस्माद्यथा सोयं दे-
वदत्त इति वाक्यं तदर्थो वा तत्कालैतत्काल-
विशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधा

Ruber ... || परिहार ... || अंशान्तर ...
पद ... पदान्तर ...

१२

30

त्। विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परि-
त्यज्याविरुद्धदेवदत्तांशमात्रं लक्षयति। तथा
तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्ष-
त्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यां-
शे विरोधाद्विरुद्धं परोक्षत्वापरोक्षत्वादिवि-
शिष्टत्वांशं परित्यज्याविरुद्धमखंडचैतन्यमात्रं
लक्षयतीति। अथाधुनाहं ब्रह्मास्मीत्यनुभववा-
क्यार्थो वर्ण्यते। एवमाचार्येणाध्यारोपापवाद-
न्यायेन तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडा-
र्थेऽवबोधितेऽधिकारिणोहं नित्यशुद्धबुद्धमुक्त-
सत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मीत्य-
खंडाकाराकारिता चित्तवृत्तिरुदेति। सा तु चि-
त्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्र-
ह्म विषयीकृत्य तद्गताज्ञानमेव बाधते। तदा
पटकारणतंतुदाहे पटदाहवत् अखिलकार-
णेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधित-
त्वात्तदंतर्भूताखंडाकाराकारिता चित्तवृत्ति

... || अधिकारी ... || प्रतिबिंब ...
विषयीकृत ... || बाध्यते ... || दाहे ...
... || अखंड चैतन्य Brahma ...
...




31

।यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयी
करणं फलं तु प्रकरणप्रतिपाद्यार्थज्ञानस्य त
दनुष्ठानस्य च तत्र श्रूयमाणं प्रयोजनं यथा
तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति अद्वितीय
वस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते। प्रक
रणप्रतिपाद्यस्य तत्र प्रशंसनमर्थवादः। यथा
तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्य
मतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशं
सनं। प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमा
णा युक्तिरुपपत्तिः। यथा तत्र सोम्यैकेन मृत्पिं
डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विका
रो नामधेयं मृत्तिकेत्येव सत्यं इत्यादावद्वितीय
वस्तुसाधने विकारस्य वाचारंभणमात्रत्वे यु
क्तिः श्रूयते। मननं तु श्रुतस्याद्वितीयवस्तुनो
वेदान्तानुगुणयुक्तिभिरनवरतमनुचिंतनं।
विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तु

२४

32

सजातीयप्रत्ययप्रवाहो निदिध्यासन
। समाधिर्द्विविधः। सविकल्पको निर्विकल्पक
श्चेति। तत्र सविकल्पको नाम ज्ञातृज्ञानादिवि
कल्पलयानपेक्षयाद्वितीयवस्तुनि तदाका
राकारितायाश्चित्तवृत्तेरवस्थानं। तदा मृन्मय
गजादिभानेपि मृद्भानवत् द्वैतभानेप्यद्वैतं व
स्तु भासते। तदुक्तमभियुक्तैः। दृशिस्वरूपं गगनो
पमं परं सकृद्विभातं त्वजमेकमक्षरं। अलेपकं
सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त। निर्वि
कल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षया
द्वितीयवस्तुनि तदाकाराकारिताया श्चित्तवृत्ते
रतितरामेकीभावेनावस्थानं। तदा तु जलाकारा
कारितलवणानवभासेन जलमात्रावभासवदद्व
द्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासे
नाद्वितीयवस्तुमात्रमवभासते। ततश्चास्य सुषु
प्तेश्चाभेदशंका न भवति। उभयत्र वृत्त्यभाने स
मानेपि तत्सद्भावासद्भावमात्रेण तयोर्भेदोपप



...नः॥ अस्यांगानि॥ यमनियमासनप्राणायामप्र
त्याहारध्यानधारणासमाधयः॥ तत्राहिंसा
सत्यास्तेयब्रह्मचर्यापरिग्रहायमाः॥ शौचसं
तोषतपःस्वाध्यायेश्वरप्रणिधानान्यानिय
माः॥ करचरणादिसंस्थानविशेषलक्षणा
निपद्मस्वस्तिकाद्यासनानि॥ रेचकपूरककुं
भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः
इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहा
रः॥ अद्वितीयवस्तुन्यंतरिंद्रियधारणं धारणा
तत्रवस्तुनि विच्छिद्य विच्छिद्यांतरिंद्रियवृत्तिप्रवा
हो ध्यानं॥ समाधिस्तूक्त एव सविकल्पः॥ अस्य
निर्विकल्पकस्यांगिनो लयविक्षेपकषायरसा
स्वादलक्षणाश्चत्वारो विघ्नास्तवेति॥ लयस्ताव
दखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा॥ अखंडवस्त्व
नवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः॥ लय
विक्षेपाभावेपि चित्तवृत्ते रागादिवासनया स्तब्धी
भावादखंडवस्त्वनवलंबनं कषायः॥ अखंडव

२५



33

Bed. Lid. भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे &c. Soluto pectoris vinculo, resciduntur dubia, et annihilantur opera materiae seu nodi vel vinculi illius, à visione illa Beatifica.

स्त्ववलंबनेपि चित्तवृत्तेः सविकल्पकानंदास्वादनं
रसास्वादः॥ समाध्यारंभसमये सविकल्पकानंदा
स्वादनं वा॥ अनेन विघ्नचतुष्टयेन रहितं चित्तं नि
र्वातदीपवदचलं सदखंडचैतन्यमात्रमवतिष्ठते
यदा तदा निर्विकल्पकसमाधिरुच्यते॥ तदुक्तं
॥ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः सक
षायं विजानीयाच्छमप्राप्तं न चालयेत्॥ नास्वा
दयेद्रसं तत्र निःसंगः प्रज्ञया भवेदिति॥ यथादी
पो निवातस्थो नेंगते सोपमा स्मृतेति॥ अथ जीव
न्मुक्तलक्षणमुच्यते॥ जीवन्मुक्तो नाम स्वस्वरूपा
खंडब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखंड
ब्रह्मणि साक्षात्कृतेऽज्ञानतत्कार्यसंचितक
र्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबं
धरहितो ब्रह्मनिष्ठः॥ भिद्यते हृदयग्रंथिश्छिद्यं
ते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृ
ष्टे परावरे इत्यादिश्रुतेः॥ अयं तु व्युत्थानसमये
मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणांध्य

4 रसास्वादः: Relicto Deo instabili voluptate fruitur. Hisi impedimentis libera mens ... instar Lucernae ... ubi nullus ventus. flat.

Tollantur haec 4 impedimenta ... Renovato illo obliviosi ... Somno, Distractione quiescat, ... per कषाय ... voluptates, tunc fiet libera ... cognitionem Dei.

जीवन्मुक्तः:
Est Dei (à mente) individui cognitio ... ignorantia materialitatis ... in Deo manifestato, ... dubio ... materialitatis affectibus, ...

साविकल्पकः: Subdeterminatus ... Anand gustati ... Impedimentum ... Abi ... Chapte ... Prapanch ... Bojaq ... Divini ... Brahman ... परावर Eminens ... Bruthan ... hora surgendi e somno.

Bed hirt सचक्षुरचक्षुरिवसकर्णोऽकर्णइवेत्यादि

Ita ego ... [illegible]

मांद्यपंग्वादिमाज्ञनेनेंद्रियग्रामेणाशनायापिपासा
शोकमोहादिमाज्ञनेनांतःकरणेन च तत्तत्पूर्ववा
सनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञाना
विरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्पर
मार्थतो न पश्यति। यथेंद्रजालमिति ज्ञानवान्
तदिंद्रजालं पश्यन्नपि परमार्थमिदमिति न पश्य
ति। सचक्षुरचक्षुरिव सकर्णोऽकर्णइवेत्यादिश्रु
तेः॥ उक्तं च॥ सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च
पश्यन्नपि चाद्वयत्वतः॥ तथापि कुर्वन्नपि निःक्रि
यश्च यः स आत्मविन्नान्य इतीह निश्चयः॥ अस्य ज्ञा
नात्पूर्वं विद्यमानानामिवाहारविहारादीनामनु
वृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति। शुभाशु
भयोरौदासीन्यं वा। तदुक्तं। बुद्धाद्वैतसतत्वस्य यथे
ष्टाचरणं यदि। शुनां तत्वदृशां चैव को भेदोऽशुचिभ
क्षणे इति ब्रह्मवित्वं तथा मुक्त्वा स आत्मज्ञो न चेत
र इति। तदानीममानित्वादीनि ज्ञानसाधनानि अ
द्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्तंते। त

Solute ... [illegible marginal notes in Latin]

२६

[illegible notes in Latin] ... Paramarth ... Brahmen ... Sicut ...

31

BIBLIOTECA NAZ. CENTR. VITTORIO EMANUELE

दुक्तं॥ उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः
अयत्नतो भवंत्यस्य न तु साधनरूपिणः॥ किं बहु
ना॥ अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापि
तानि सुखदुःखलक्षणान्यारब्धफलान्यनु
भवन्नंतःकरणाभासादीनामवभासकः स
न्तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणे ली
ने सत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात्
परमकैवल्यमानंदैकरसमखिलभेद
प्रतिभासरहितमखंडब्रह्मावतिष्ठते॥ न तस्य
प्राणा उत्क्रामंत्यत्रैव समवनीयंते॥ विमुक्तश्च वि
मुच्यत इति श्रुतेः॥ ॥इति श्रीमत्परमहंसपरिव्रा
जकाचार्यसदानंदकृतो वेदांतसारः संपूर्णः॥ ॥

[illegible notes in Latin] ... Brahma ... Corpus relinquente ...